MAY 2018

23 ~~WEDNESDAY~~ ~~143-222~~ WK 21

महावि० का नाम
श्री० बिहारी सिं० महावि० रहीमपुर
इकाड़िया।
दिनाङ्क - 2.1.2021
उपशास्त्री द्वितीय वर्ष
व्याकरण
भाग - 006

विषय - बहुव्रीहि समास प्रकरणम्।

'ह्रैमीति'। ह्रैमो विकार भूतेत्यर्थः। 'अनुदात्तादेश्च' इत्यञ्, टिलोपः, आदिवृद्धिः 'टिड्ढ—' इति ङीप्, 'ह्रैमीति' रूपम्। 'ह्रैमी' मुद्रिका यस्येति विग्रहः। पुंवत्त्वे ङीपो निवृत्तिः। अत्र—अस्तद्धितस्य विकारार्थकत्वान्न पुंवत्त्वनिषेधः स्यादेतत्, व्याकरणमधीते वेत्ति वा वैयाकरणी, तदधीते 'तद्वेद' इत्यण् तद्धितः। 'यस्येति च' इत्यकार लोपः। अणो णित्वात् तन्निमित्त

~~24 THURSDAY~~ ~~144-221~~ ~~WK 21~~

कायां यकाराकारस्य पर्जन्यवल्लक्षणप्रवृत्त्या प्राप्ताया वृद्धेः 'न य्वाभ्याम्' — इति निषेधः। यकारात् प्रागैकारागमश्च, 'टिड्ढाणञ्' — इति ङीप्। वैयाकरणी भार्या यस्येति बहुव्रीहौ पुंवत्त्वे ङीपो निवृत्तौ वैयाकरणभार्य इति रूपम्। तथा स्वश्वस्यापत्यं स्त्री 'अत इञ्' इति इञोऽपवादः शिवाद्यण्, 'यस्येति च' इति लोपः। प्रथम वकारात् परस्य अकारस्यादिवृद्धिर्न य्वाभ्यामिति निषेधः। प्रथमवकारात् प्रागौकारागमश्च, 'टिड्ढ—' इति ङीप्। सौवश्वी भार्या यस्येति बहुव्रीहौ पुंवत्त्वे ङीपो निवृत्तौ सौवश्वभार्य इति रूपमिति स्थितिः। अत्रोभयत्रापि आदिवृद्धेः न

| Su | Mo | Tu | We | Th | Fr | Sa |
|---|---|---|---|---|---|---|
| | | 1 | 2 | 3 | 4 | 5 |
| 6 | 7 | 8 | 9 | 10 | 11 | 12 |
| 13 | 14 | 15 | 16 | 17 | 18 | 19 |
| 20 | 21 | 22 | 23 | 24 | 25 | 26 |
| 27 | 28 | 29 | 30 | 31 | | |

MAY '18

2018 MAY

FRIDAY 25 WK 21 145-220

'न य्वाभ्याम्' — इति निषेधेऽपि अणः तद्धितस्य णित्वेन स्वरूपयोग्य वृद्धिनिमित्तस्य तद्धितस्येति शेषः। अणः वृद्धिनिमित्तस्य यत् फलं वृद्धिस्तेन उपधानं तात्कालिक साहित्यं तदभावादित्यर्थः। 'वृद्धेस्तद्धितस्य' इत्येतावत्युक्तेऽपि निमित्तत्व संबन्धं वृद्धेरिति षष्ठी माक्षिप्य 'वृद्धिनिमित्ततद्धितस्य' इत्यर्थलाभे सति निमित्त ग्रहणात् फलोपहित निमित्तत्वं विवक्षितमिति विज्ञायत इति भावः। ~~यद्य~~ यद्यप्यैजागम सिद्ध वृद्धिं प्रति अण्प्रत्ययः फलोपहितमेव निमित्तम्, तथापि वृद्धिशब्देन विहितां वृद्धिं प्रति फलोपहितं निमित्तं न भवत्येवेति न दोषः। वृद्धिशब्देन विहितैव वृद्धिरिह गृह्यत इत्यत्रापि इदमेव निमित्तग्रहणं लिङ्गम्। अन्यथा ऐजागमादत्र फलोपहित निमित्तत्वस्यापि सत्त्वात् तन्निमित्त-

~~SATURDAY~~ 26 WK 21 ~~146-219~~

ग्रहणं निष्फलं स्यात्। विस्तरस्तु शब्देन्दुशेखरे द्रष्टव्यः। ~~'स्वाङ्गाच्चे~~ 'स्वाङ्गाच्चेतः'। इत इति च्छेदः। तदाह — 'स्वाङ्गाद्य ईकार इति'। 'सुकेशी भार्य' इति। सुशोभनाः केशा यस्याः सा सुकेशी, 'स्वाङ्गाच्चोपसर्जनात्' इति ङीष्। 'स्त्रियाः पुंवत्' — इति प्राप्तस्य निषेधः। 'पटुभार्य' इति। पट्वी भार्या यस्येति विग्रहः। पटुत्वस्य ~~अ~~

SUNDAY 27

अस्वाङ्गत्वान्न पुंवत्त्व निषेधः। किन्तु पुंवत्त्वे 'वोतो गुणवचनात्' इति ङीषो निवृत्तिरिति भावः। 'अकेशभार्य' इति।

दिनेश प्र० सिंह
(असोसियेट प्रोफेसर
(~~व्याकरण~~ व्याकरण)

JUN '18

| Su | Mo | Tu | We | Th | Fr | Sa |
|---|---|---|---|---|---|---|
| | | | | | 1 | 2 |
| 3 | 4 | 5 | 6 | 7 | 8 | 9 |
| 10 | 11 | 12 | 13 | 14 | 15 | 16 |
| 17 | 18 | 19 | 20 | 21 | 22 | 23 |
| 24 | 25 | 26 | 27 | 28 | 29 | 30 |

Scanned with CamScanner